# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा - शास्त्रिद्वितीयवर्षम्, सत्र-३ | **प्रश्नपत्रम् – ७**<br>(C.E.2.3.3 - NEW)<br>**( हरिवाक्यसुधासिन्धुः )** | **गुणाः - ७०** |
|---|---|---|
| **विषयः - स्वामिनारायणवेदान्तः (J)** | | |
| **दिनाङ्कः - ११/१२/२०१८** | | **समयः - ०२:०० तः ०५.००** |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम् ।** **( १० )**

(१) अन्तःकरणचतुष्टयस्य लक्षणानि पृथक् पृथक् लिखत ।

(२) त्रयोदशतरङ्गे नित्यानन्दमुनिना पृष्टं प्रश्नं विवेचयत ।

(३) लौकिकेन्द्रियैः परमात्मनः साक्षात्कारः जायते न वा ? एकपञ्चाशत्तरङ्गानुसारं विवेचयत ।

**प्रश्नः २ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **( १० )**

(१) प्रकृतेः चतुर्विंशतितत्त्वानां लक्षणानि द्वादशतरङ्गानुसारं लिखत ।

(२) एकोऽहं बहुस्यां प्रजायेय – इति वेदवचनस्य याथार्थ्यं एकचत्वारिंशत्तरङ्गानुसारं स्पष्टयत ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोनिर्दिष्टेषु प्रश्नेषु द्वावेव प्रश्नौ समाधेयौ ।** **( १० )**

(१) निष्कामसकामयोः भक्तयोः लक्षणानि लिखत ।

(२) धर्मज्ञानयोः अङ्गप्रधानयोः भक्तयोः लक्षणानि लिखत ।

(३) एकान्तिकभक्तानां धर्मज्ञानवैराग्यभक्तीति चतुर्णां गुणानां प्राधान्यमुपपादयत ।

**प्रश्नः ४ निम्नलिखितेषु प्रश्नेष्वेक एव समाधेयः ।** **( १० )**

(१) चतुर्विधां मुक्तिं यथाग्रन्थं प्रतिपादयत ।

(२) द्विपञ्चाशत्तरङ्गानुसारं साङ्ख्यादीनां चतुर्णां शास्त्राणां सिद्धान्तं लिखत ।

## तृतीयान्विति:

**प्रश्नः ५ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम् ।** **( १० )**

(१) हरिवाक्यसुधासिन्ध्वनुसारं भगवतः श्रीस्वामिनारायणस्य रूपसौन्दर्यशोभामुपवर्णयत ।

(२) भक्तस्य परमात्मना सह तादात्म्यभावसम्बन्धः केन उपायेन भवति ? कथमिति स्पष्टयत ।

(३) वपुषि जीवस्य वेदितृत्वं कियदिति यथाग्रन्थमुपपादयत ।

**प्रश्नः ६ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **( १० )**

(१) शरीरस्थानि चतुर्विंशतितत्त्वानि जडानि वा चेतनानीति स्पष्टयत ।

(२) शताधिकषट्चत्वारिंशत्तरङ्गानुसारं भगवतः श्रीस्वामिनारायणस्य रुच्यभिप्रायमुपवर्णयत ।

**प्रश्नः ७ अधोनिर्दिष्टेषु प्रश्नेषु केचन दशप्रश्नाः समाधेयाः ।** **( १० )**

(१) अस्मिन् शरीरे कस्य वेदितृत्वं वर्तते ?

(२) परमात्मा साकार उत निराकारः ?

(३) तपोमासः कः ?

(४) निष्कामभक्ताः के ?

(५) धवलांशुकः कः ?

(६) वेश्मनः इत्यस्यार्थः कः ?

(७) चतुर्विधा मुक्तिः का ?

(८) एकोऽहं बहुस्यां प्रजायेय - इति श्रुतिवाक्यं कस्यामुपनिषदि समायाति ?

(९) हरिवाक्यसुधासिन्धौ कति तरङ्गाः सन्ति ?

(१०) महत्तत्वस्य केन सहैक्यम् ?

(११) मात्राः काः ?

(१२) प्रलयः कतिविधः ?

(१३) प्रकृतेः त्रयो गुणाः के ?

(१४) प्रतिशरीरं जीवः एक उत अनेकः ?

(१५) हरिवाक्यसुधासिन्धुः - इति नाम्नः किमौचित्यम् ?

--००--